गायत्रीब्रह्मकल्पः

पथपा

गा.सं.प.स्म ५८०प

गाहुवीमंत्रकल्प

२००

...यजनः॥ अथ गायत्री ब्रह्मकल्पः॥ नारद उवाच॥...
...न्यासं वर्णरूपं च कीदृशं॥ ऋषिश्छंदो देवताछंदश्चावाहनविस
र्जने॥१॥ हृदयं च शिखा गोत्रं तथा शीर्षं च कीदृशं॥ विनियोगस्तथा कु
क्षिःपादौ तु परमेश्वर॥२॥ ध्यानं मुखं च मातं त्यंपदन्यासविधिं ततः॥ ति
दद्धोतुमिब्रूहि मे कमलासन॥३॥ ब्रह्मोवाच॥ अथ ते प्रवक्ष्यामि श्र
णु वत्स द्विजोत्तम॥ छंदो गायत्री गायत्र्याः सविता चैव देवता॥ अग्निस्तु
वर्णो मुखं चाग्निर्विश्वामित्र ऋषिस्तथा॥ ब्रह्मा शिरः शिखा रुद्रो विष्णुर्हृद
यमेव च॥५॥ तस्याः सांख्यायनं गोत्रं सा चतुर्विंशत्यक्षरा॥ त्रिपदा चैव षट्
कुक्षिः पंचशीर्षा भवति हि॥६॥ ऋग्वेदोऽस्याः प्रथमः पादो भवति॥ यजुर्वेदो
द्वितीयः। सामवेदस्तृतीयः॥७॥ पूर्वेति प्रथमा कुक्षिर्भवति। दक्षिणा द्विती
या। पश्चिमा तृतीया। उत्तरा चतुर्थी। ऊर्ध्वा पंचमी। अधोऽस्याः षष्ठी॥८॥
व्याकरणमस्याः प्रथमं शीर्षं भवति। शिक्षा द्वितीयं। कल्पस्तृतीयं। निरुक्तं
चतुर्थं। ज्योतिषामयनमिति पंचमं॥९॥ एवं ध्यात्वा तु गायत्रीं जपेद्द्वादशा
लक्षकं। त्रिपदा त्र्यक्षरा ज्ञेया चतुष्पादा षडक्षरा॥१०॥ जपेत्तु त्रिपदा ब्र...

त्वा॥ अर्चनेतु चतुष्पदा॥ न्यासं कुर्यात्तथा जाप्ये अग्निकार्ये [illegible] च वै॥
अन्यस्मिन्नपि तंत्रे शरीरे चात्मनो बुधः॥ चतुर्विंशतिस्थानेषु पादौ यावन्तु मस्त
कं॥ ११॥ अथ न्यासक्रमः॥ आचमनं॥ प्राङ्मुख उपविश्य॥ ऊर्ध्वकेशि
विरूपाक्षि मांसशोणितभोजने॥ तिष्ठ देवि शिखाबंधे चामुंडे ह्यपराजि
ते॥ १२॥ ब्रह्मवादिसहस्राणि रुद्रमूलशतानि च॥ विष्णोर्नामसहस्रा
णि शिखाबंधं करोम्यहं॥ १३॥ अनेन मंत्रेण गायत्र्या वा। मानस्तोक इत्य
नेन वा शिखां शिखां बध्वा आचम्य। सहस्रोणि स्वहस्तस्य वाको सावहेतपः॥ ६॥१
तामामीशानो भगवः पराचीनामनु स्वाकृधी इति मंत्रेण वाकुं हृदयं च
स्पृष्ट्वा। उत्तिष्ठंतु ते भूतानि भूमौ तिष्ठंतु भूपतिः॥ भूतानामविरोधेन
ब्रह्मकर्म समारभे॥ १४॥ इति मत्वा प्राण्या दर्भमुष्टिमादाय पृथ्वीति मं
त्रस्य मेरुपृष्ठ ऋषिः कूर्मो देवता सुतलं छंदः आसने विनियोगः॥ पृ
थ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता॥ त्वं च धारय मां देवि पवित्रं
कुरु चासनं॥ अंतरिक्ष रक्षोन्तरिक्षमप्रमत्ततपः॥ विश्वयशाय नमः। माया
त्रायै नमः। अनंताय नमः। इति [illegible] सम्पूज्य [illegible] कल्प्या॥ अपकामन्तु

...न्यांश्चाः सर्वतोदिशं ॥ सर्वेषामविरोधेन ब्रह्मकर्म समारभे ॥ इ
ति भूतान्यपसार्य ॐ सर्वभूतनिवारणाय शार्ङ्गाय सशराय अस्त्रराजा
य सुदर्शनाय हुं फट् स्वाहा इति सुदर्शनमंत्रेण दिग्बंधं च कृत्वा । गुरुभ्यो न
मः । परमगुरुभ्यो नमः । परमेष्ठीगुरुभ्यो नमः । परापरगुरुभ्यो नमः
। गं गणपतये नमः । दं दुर्गायै नमः । क्षं क्षेत्रपालाय नमः । वं वटुक
नाथाय नमः । इति गुर्वादीन्नमस्कृत्य संध्याचमनं संकल्प्य । गायत्रीमं
त्रांगलेन भूतशुद्धिप्राणप्रतिष्ठामातृकान्यासं च कृत्वा सविशेषं प्रा
णायामं कुर्यात् ॥ तद्यथा । ॐ गोविंदाय अंगुष्ठाभ्यां नमः । ॐ महीधरा
य तर्जनीभ्यां नमः । ॐ हृषीकेशाय मध्यमाभ्यां नमः । ॐ त्रिविक्रमाय
अनामिकाभ्यां नमः । ॐ विष्णवे कनिष्ठिकाभ्यां नमः । ॐ माधवाय क
रतलकरपृष्ठाभ्यां नमः । इति करांगुलीन्यासं कृत्वा । ॐमित्यस्य एव ॥२॥
स्य परब्रह्म ऋषिः परमात्मा देवता देवी गायत्री छंदः । अग्निर्बीजं ॐ
शक्तिः । मं कीलकं । विनियोगः । उदात्तस्वरः । ... तद्वर्गोत्रं ...

वसिष्ठविश्वामित्रभरद्वाजादयः ऋषयः । ब्रह्मविष्णुम...

गायत्रीत्रिष्टुप्जगत्यः छंदांसि। भूरंतरिक्षं द्यौरिति स्थानानि। गार्हपत्यद
क्षिणाग्न्याहवनीयास्त्रयोग्नयः। ऋग्यजुःसामवेदाः। [illegible] जाग्रत्स्वप्नसुषुप्त
योऽवस्थाः। सप्तानां व्याहृतीनां विश्वामित्रजमदग्निगौतमात्रिवसिष्ठ रक्षांज
कश्यपा ऋषयः। अग्निवायुसूर्यबृहस्पतिवरुणेंद्रविश्वेदेवा देवताः। गा
यत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुप्जगत्यः छंदांसि। श्वेतश्यामपीत
पिशंगनीललोहितकनका वर्णाः। षड्जऋषभगांधारमध्यमपंचमधैवत
निषादाः स्वराः। पृथिव्यप्तेजोवाय्वाकाशकालदिगात्मनो बीजानि। श्रीकी
र्तिमायाधृतिमेधास्मृतिवाचः शक्तयः। अत्रि[illegible] काश्यपगौतमांगि
रसभार्गवकौशिकवासिष्ठानि गोत्राणि। शब्दस्पर्शरूपरसगंधमनोबु
द्धयस्तत्वानि। विततसमांजलिकशाकटविस्तृतयमपाशग्रथितव्या
पकामुद्राः। प्राणापानव्यानोदानसमानमनोबुद्धिजनितपापोपशम
नं फलं। मध्यगायत्र्या गायत्री छंदः। विश्वामित्र ऋषिः। सवितादेव
ता। शिरसः परमेष्ठी प्रजापति ऋषिः। परमात्मा देवता। त्रिष्टुप् छंदः।

सर्वेस्वराः। दीप्तो वर्णः। सर्वकर्म्मारंभे प्राणायामे विनियोगः। ततः प्राणा
याम मंत्रन्यासं कुर्यात्॥ ॥ तद्यथा ॐ ब्रह्मणे नमः। ॐ हृदयाय नमः।
ॐ मं मुखाय नमः। ॐ भूः पादाभ्यां नमः। ॐ भुवः जानुभ्यां नमः। ॐ स्वः गुल्फा
य नमः। ॐ महः नाभ्यै नमः। ॐ जनः हृदयाय। ॐ तपः कंठाय। ॐ सत्यं मूर्द्ध्ने
नमः। ॐ तत्सवितुर्ब्रह्मात्मने हृदयाय नमः। ॐ वरेण्यं विष्ण्वात्मने शिर
से स्वाहा। ॐ भर्गो देवस्य ज्योतिरात्मने शिखायै वषट्। ॐ धीमहि मात्मा
त्मने कवचाय हुं। ॐ धियो यो नः ज्ञानात्मने नेत्रत्रयाय वौषट्। ॐ प्रचो
दयात् सत्यात्मने अस्त्राय फट्। ॐ आपः स्तनाभ्यां नमः। ॐ ज्योतिर्नेत्राभ्यां
नमः। ॐ रसो जिह्वायै नमः। ॐ अमृतं तत्ताशाय नमः। ॐ ब्रह्म भूर्भुवः
मिकाय स्वरों कवचाय हुं। ततोऽङ्गुलाकानिष्ठिकांगुष्ठैर्नासां धारयन् प्राणाया
मान् कुर्यात्॥ तत्र पूरकेण नाभिस्थं रक्तं ब्रह्माणं कुंभकेन हृदयस्थ
नीलं विष्णुं रेचकेन ललाटस्थं श्वेतं शिवं ध्यायेत्। ॐ भूः ॐ भुवः ॐ
स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धी ॥३॥
महि धियो यो नः प्रचोदयात् ॐ आपो ज्योती रसोऽमृतं ॐ ब्रह्म भू

र्भुवः स्वरों ॥ दशप्रणवा गायत्री प्राणायामं त्रिवारं कृत्वा । ततो गायत्रीन्या
समारभेत । प्रणवस्य परब्रह्म ऋषिः । परमात्मा देवता । देवी गायत्री छंदः ।
ॐ अं बीजं । उं शक्तिः । मं कीलकं । विद्युद्वर्णः । उदात्तः स्वरः । नातयं गोत्रं
। मंत्राणां वसिष्ठ विश्वामित्र भरद्वाजा ऋषयः । गायत्री त्रिष्टुप् जगत्यः
स्तु ५ छंदांसि । ब्रह्मविष्णुमहेश्वरा देवताः । भूरंतरिक्षं द्यौरिति स्थानानि । गार्हप
त्य दक्षिणाग्न्याहवनीयाः रूपाणि । पीतविद्युच्छ्वेता वर्णाः । जाग्रत्स्वप्न
सुषुप्तयोऽवस्थाः । व्याहृतित्रयस्य विश्वामित्र जमदग्नि भरद्वाजा ऋ
षयः । अग्निवायुसूर्या देवताः । गायत्र्युष्णिगनुष्टुभः छंदांसि । श्वेत
श्यामपीता वर्णाः । षड्ज ऋषभ गांधाराः स्वराः । पृथिव्यप्तेजांसि बीजा
नि । श्री कीर्त्ति मायाः शक्तयः । अग्निवैश्यप काश्यप गोतमा नि गोत्राणि ।
शब्द स्पर्श रूपाणि तत्त्वानि । वितत समंजलि करका मुद्राः । प्राणा
पान व्यान जनित पापोपशमनं फलं । गायत्र्या गायत्री छंदः । विश्वा
मित्र ऋषिः । सविता देवता । वरेण्यमिति बीजं । धियमिति शक्तिः । णकारः साधा
रणः शक्तिः । यात्रकी [illegible] [illegible] । ब्रह्मशिरः । विष्णुस्तु

दयं। रुद्रो ललाटं। त्रैलोक्यं चरणौ। पृथ्वी कुक्षिः। सांख्यायनं गोत्रं। त्रि ४२
पदा गायत्री उपनयनादि संध्योपासने विनियोगः। अथ पृथग्व्याहृति
त्रय गायत्री ऋष्यादिन्यासः। गायत्री प्रथमपादस्य विश्वामित्र ऋ
षिः। ब्रह्मा देवता। गायत्री छंदः। गायत्री छंदः। द्वितीयपादस्य वि
श्वामित्र ऋषिः रुद्रो देवता। गायत्री छंदः। तृतीयपादस्य विश्वामित्र ऋ
षिः। विष्णुर्देवता। गायत्री छंदः। उपनयनादि प्रातर्गायत्री मध्यान्हे सा
५ वित्री सायाह्ने सरस्वती संध्योपासने विनियोगः। इति क्रमेणोच्चारः। ऋ
ग्वेदोऽस्याः प्रथमः पादो भवति। यजुर्वेदो द्वितीयः। सामवेदस्तृतीयः
। अथ पादन्यासः। पूर्वेति प्रथमा कुक्षिर्भवति। दक्षिणा द्वितीया। प
श्चिमा तृतीया। उत्तरा चतुर्थी। ऊर्ध्वा पंचमी। अधोऽस्याः षष्ठी। अ
थ कुक्षिन्यासः। व्याकरणमस्याः प्रथमं शीर्षं भवति। शिक्षा द्वितीयं ||४||
कल्पस्तृतीयं। निरुक्तं चतुर्थं। ज्योतिषामयनमिति पंचमं। अथ शीर्ष
न्यासः। ततो धियो यो नः प्रचोदयादिति करसंपुटं कृत्वा। ॐ भूर्भुवः
स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदया

दिति गायत्र्या व्यापकं न्यासं कृत्वा। ॐ भूः अग्न्यात्मने अंगुष्ठाभ्यां नमः।
ॐ भुवः वाय्वात्मने तर्जनीभ्यां नमः। ॐ स्वः सूर्यात्मने मध्यमाभ्यां न
मः। ॐ महः ब्रह्मात्मने अनामिकाभ्यां नमः। ॐ जनः विष्ण्वात्मने कनिष्ठि
काभ्यां नमः। ॐ तपः सत्यं रुद्रात्मने करतलकरपृष्ठाभ्यां नमः। ॐ भूः
अग्न्यात्मने हृदयाय नमः। ॐ भुवः वाय्वात्मने शिरसे स्वाहा। ॐ स्वः
सूर्यात्मने शिखायै वौषट्। ॐ महः ब्रह्मात्मने कवचाय हुं। ॐ जनः वि
ष्ण्वात्मने नेत्रत्रयाय वौषट्। ॐ तपः सत्यं रुद्रात्मने अस्त्राय फट्।
अथ षडंगन्यासः। ॐ तत्सवितुर्ब्रह्मात्मने हृदयाय नमः। ॐ व
रेण्यं विष्ण्वात्मने शिरसे स्वाहा। ॐ भर्गो देवस्य रुद्रात्मने शिखा
यै वषट्। ॐ धीमहि ब्रह्मात्मने कवचाय हुं। ॐ धियो यो नः विष्ण्वा
त्मने नेत्रत्रयाय वौषट्। ॐ प्रचोदयात् रुद्रात्मने अस्त्राय फट्। इ
ति षडंगं कृत्वा। ॐ परोरजसे सावदों इति दिग्बंधः। ततः ॐ भूः अं
गुष्ठाभ्यां नमः। ॐ भुवः तर्जनीभ्यां नमः। ॐ स्वः मध्यमाभ्यां नमः।

ॐ तत्सवितुर्वरेण्यं अनामिकाभ्यां नमः। ॐ भर्गोदेवस्य धीमहि कनि

ष्ठिकाभ्यां नमः। ॐ धियो यो नः प्रचोदयात् करतलकरपृष्ठाभ्यां

नमः। ॐ परो रजसे सावदोम् इति दिग्बंधः। ॐ भूः हृदयाय नमः। ॐ भु

वः शिरसे स्वाहा। ॐ स्वः शिखायै वषट्। ॐ तत्सवितुर्वरेण्यं कवचाय

हुं। ॐ भर्गो देवस्य धीमहि नेत्रत्रयाय वौषट्। ॐ धियो यो नः प्रचोदया

त् अस्त्राय फट्। ॐ परो रजसे सावदोम् इति दिग्बंधः। ततो गायत्र्या

द्यार न्यासे ऋषिर्देवता छंदः स्थान स्वर वर्ण तत्त्व शक्ति बीज मुद्रा पा

तक नाशन परमपद प्राप्त्यर्थं अंगन्यास स्थान केन न्यसेत्। गायत्री

चतुर्विंशात्यक्षराणां वसिष्ठ भरद्वाज गौतम भृगु शांडिल्य लोहित ग

र्ग शांडिल्य सनत्कुमार सत्यवर्ज धर्व कश्यप जमदग्नि त्रिविष्णु पराशर पु

ण्डरीक ऋतुदक्षांगिरः कार्त्तिकेय मर्कंडु गस्त्य विश्वामित्रौ ऋषयः॥२४॥ ॥५॥

॥१॥ अग्नि वायु सूर्य विद्युद्यमेंद्र विश्वेदेवा पर्जन्येंद्र गंधर्व सत्य मि

त्रावरुण त्वष्टृ वसु मरुत् बृहदंगिरस विश्वेदेवा विश्वदेव गर्ग शर्व

शुक्ल विष्णु सवितारो देवता ॥२४॥२॥ गायत्र्यु[stain]ष्णिगनुष्टुप् बृहती
पंक्ति त्रिष्टुप् जगती अतिसत्या विराट् त्रिपदाक्षर पंक्त्यक्षर पंक्तिका
त्यायनी त्रिपदाक्षर पंक्तिकात्यायन्यक्षर पंक्तिकात्यायनी जगती जग
तीमही श्वयाम ती सत्यागायत्र्यः छंदांसि ॥२४॥३॥ उदात्तस्वरितानुदा
त्तोदात्तोदात्तस्वरितानुदात्तोदात्तस्वरितानुदात्तोदात्तस्वरितप्रचयप्रच
यप्रचयोदात्तानुदात्तोदात्तस्वरितप्रचयानुदात्तोदात्तस्वरिताः स्वराः ।
॥२४॥४॥ चंपकातसीपुष्पपिंगलेंद्रनील दीप्ताग्नि[illegible]टिक विद्यु
त्तारका मेघ रक्त म[stain]र्कत शुक्ल कांचन कुंद पद्मराग शंख पांडुर
गौर रुक्म विद्युत्सूर्येंद्रनील कुंकुम शुक्लाः वर्णाः ॥२४॥५॥ पृथि
व्यप्तेजो वाय्वाकाश गंधरसरूपस्पर्शशब्द वाक् हस्तोपस्थपायूपा
द श्रोत्र त्वक् चक्षु र्घ्राण जिह्वा मनोऽहंकारचित्तोव्यक्तानि तत्त्वानि ॥
॥२४॥६॥ सती। प्रभावती। नित्या। शोभना। मेधा। विमला। प्रभावती
। जया। प्रह्लादिनी। कांता। जिह्वा। सरस्वती। विद्युद्वर्णा। विश्वरूपा।

तत्वानि
3

विभूति। ज्ञानी। योगा। ज्ञाना। गांधा। रती। प्रीती। पद्मालया। विलासिनी। मातृ
वाः श्लोकयः ॥२४॥७॥ ॐ अ आ इ ई उ ऊ ए ऐ ओ औ अं अः कचटतपयश
लवक्षाक्षर ॥२४॥८॥ सं मुखं सं पु टं वितत विस्तीर्णं एकमुखं द्वि
मुखं त्रिमुखं चतुर्मुखं पंचमुखं षण्मुखं अधोमुखं व्यापकां जलि
कं शकटं यमपाशं ग्रथितं। सन्मुखोन्मुखं प्रलंबं मुष्टिकं मीनकू
र्म्मवाराह सिंहाक्रांत महाक्रांत मुद्गर पल्लवा मुद्राः ॥२४॥९॥ पातको
पपातक महापातक ग्रह रोग शांति मूल तत्व गम्यागमन नानद्य भक्ष्य
पुवध गुरुवध गोवध स्त्रीवध वादौ ग्राम को त्पितृवध नामि
त सर्वजन्मार्जित पूर्वजन्मार्जितप्रतिग्रह जनित सर्वजन्मार्जित पात
क नाशन विरंचिपद प्राप्ति विष्णुपद प्राप्ति रुद्रपद प्राप्ति सगुण ब्रह्म
पद प्राप्ति परमपद प्राप्त्यर्थं फलं ॥२४॥१०॥ पादांगुष्ठ गुल्फ जंघा जा
नूरू शिश्नवृषण कटि नाभ्युदर स्तनोरः कंठ दंत तालु नासिका नेत्र ॥६॥
भ्रू मध्य ललाट पूर्वमुख दक्षिण मुख पश्चिम मुखोत्तर मुख मूर्द्धा मा म१

सेकरांगुलिपर्वन्यासे च विनियोग इति स्मृत्वा ॥२४॥११॥ ॐ तत्सादंगुष्ठ
पर्वभ्यां नमः। ॐ सगुल्फाभ्यां नमः। ॐ विजंघाभ्यां नमः। ॐ तुः जानुभ्यां। ॐ वऊ
रूभ्यां। ॐ रेः शिश्नाय। ॐ णिःवृषणाभ्यां। ॐ यंकट्यै। ॐ भनाभ्यै। ॐ गोंउद
राय। ॐ देःस्तनाभ्यां। ॐ वःउरसे। ॐ स्यकंठाय। ॐ धीदंतेभ्यः। ॐ मतालुने।
ॐ हिनासिकायै। ॐ धिनेत्राभ्यां। ॐ योभ्रूमध्याय। ॐ योललाटाय। ॐ नः
पूर्वमुखाय। ॐ प्रदक्षिणमुखाय। ॐ चोपश्चिममुखाय। ॐ दउत्तरमुखा
य। ॐ यात्मूर्ध्ने नमः ॥२४॥१२॥ करन्यासे दक्षिणतर्जन्यादिपर्वादि वा
त्प ६ मकनिष्ठिकापर्वपर्यंतं तदानीं चतुर्विंशत्यक्षराणि विन्यसेत्॥ ॐ त
त् दक्षिणतर्जनीप्रथमपर्वणे नमः। ॐ स दक्षिणतर्जनीद्वितीयपर्वणे।
ॐ वि दक्षिणतर्जनीतृतीय०। ॐ तुः दक्षिणमध्यमाप्रथम। ॐ व दक्षिणम
ध्यमाद्वितीय। ॐ रे दक्षिणमध्यमातृतीय। ॐ णि दक्षिण [illegible]का
[illegible] अनामिकाप्रथम। ॐ यं दक्षिणअनामिकाद्वितीय। ॐ भ दक्षिण
अनामिकातृतीय। ॐ गों दक्षिणकनिष्ठिकाप्रथम। ॐ दे दक्षिणकनिष्ठि

नि. १ ●काद्वितीय। ॐ वद्दक्षिणकनिष्ठिकात्तृतीय। ॐ स्यवामतर्जनीप्रथम। ॐ धीवा
मतर्जनीद्वितीय। ॐ मवामतर्जनीत्तृतीय। ॐ हिवाममध्यमाप्रथम। ॐ धि
वाममध्यमाद्वितीय। ॐ योवाममध्यमात्तृतीय। ॐ योवामानामिकाप्रथ
म। ॐ नः वामानामिकाद्वितीय। ॐ प्रवामानामिकात्तृतीय। ॐ चोवामक
निष्ठिकाप्रथम। ॐ दवामकनिष्ठिकाद्वितीय। ॐ यात्वामकनिष्ठिकात्तृती ष्ठि ५
यपर्वणेनमः॥२४॥१३॥ इतिवर्णांगुलिपर्वन्यासः॥ ॐ तत्पादाभ्यांनमः।
ॐ सवितुः जंघाभ्यांनमः। ॐ वरेण्यं कट्यै। ॐ भर्गः नाभ्यै। ॐ देवस्यहृद
याय। ॐ धीमहि कंठाय। ॐ धियः मुखाय। ॐ योनेत्राभ्यां। ॐ नः भाला
टाय। ॐ प्रचोदयात् मूर्ध्ने नमः। ॐ तत् दक्षिणकरांगुष्ठाय नमः। ॐ सवि
तुः दक्षिणतर्जन्यै। ॐ वरेण्यं दक्षिणमध्यमायै। ॐ भर्गो दक्षिणानामिका
यै। ॐ देवस्य दक्षिणकनिष्ठिकायै। ॐ धीमहि वामांगुष्ठाय। ॐ धियः ॥१॥
वामतर्जन्यै। ॐ यो वाममध्यमायै। ॐ नः वामानामिकायै। ॐ प्रचोदयात
वामकनिष्ठिकायैनमः। ॐ तत्सवितुरंगुष्ठाभ्यांनमः। ॐ वरेण्यंत

ंगुलीभ्यां। ॐ भर्गो देवस्य मध्यमाभ्यां। ॐ धीमहि अनामिकाभ्यां। ॐ धियो यो
नः कनिष्ठिकाभ्यां। ॐ प्रचोदयात् करतलकरपृष्ठाभ्यां नमः। ॐ तत्सवितु
र्ब्रह्मात्मने हृदयाय नमः। ॐ वरेण्यं विष्ण्वात्मने शिरसे स्वाहा। ॐ भर्गो
देवस्य रुद्रात्मने शिखायै वषट्। ॐ धीमहि ब्रह्मात्मने कवचाय हुं। ॐ धि
यो यो नः विष्ण्वात्मने नेत्रत्रयाय वौषट्। ॐ प्रचोदयात् रुद्रात्मने अस्त्रा
य फट्। ततो गायत्रीकवचं बध्नीयात्। तेन यथा। ॐ मिति हृदये। भूरिति मु
खे। भुव इति शिरसे। स्वरिति सर्वांगेषु। अथ गायत्रीतुरीयपादस्य अथ
र्वपुत्रो विमलऋषिः परमात्मा देवता देवी गायत्री छंदः। अव्यक्तं ब्रह्म
तत्वं। धर्मार्थकाममोक्षार्थे गायत्रीस्तुतौ विनियोगः। इत्यादि स्मृत्वा
ॐ परो हृदयाय नमः। ॐ रजसे शिरसे स्वाहा। ॐ असावदोम् शिखा
यै वषट्। ॐ परो रजसे कवचाय हुं। ॐ असावदोम् नेत्रत्रयाय वौषट्
। ॐ परो रजसे सावदोम् अस्त्राय फट्। इति षडंगन्यासः। बादशचाष्टौ वा अ
पंक्ति नगमली स्तुवीत। अथ चतुर्विंशत्यक्षरेषु पृथिव्यादितत्वदृष्टिं प

प्रथमेदलेलोकत्रयदर्शिं। द्वितीयेवेदत्रयदर्शिं। तृतीयेप्राणत्रयदर्शिं। चतुर्थे
ब्रह्मदर्शिंकुर्यात्॥ अथध्यानं। प्रातःसंध्यांगायत्रींकुमारींरक्तांरक्तांबरां
रक्तमालांबालांअक्षमालाकमंडलुधरांहंसारूढांऋग्वेदमुद्गिरंतींब्र
ह्मदैवत्यांआदित्यमंडलस्थांसाहमस्मीतिध्यायन्आवाहयेत। ततोध्या
मप नं॥मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्र्यक्षणैर्युक्तामिंदुनिबद्धरत्न
मुकुटांतत्वात्मवर्णात्मिकां॥गायत्रींवरदाऽभयांकुशकुशांशुभ्रंकपालं
गुणंशंखंचक्रमथारविंदयुगलंहस्तैर्वहंतींभजे॥१॥मंदरान्दुयरोच
नांजननिभागवानैर्मुखैरिंदुमद्रत्नोद्यन्मुकुटांगसंततचतुर्विंशार्ण
8 चित्रातनुः॥अंभोजेऽरिचक्रशंखौदराक्षयौगुणंकपालांखौचपाशांकु
शौदधतीतिदधतीमवेद्भवदघध्वांतारिणीतारिणी॥२॥प्रातर्ध्यानं॥प्रा
तःसंध्यांसुमध्यांसदरुणवसनांविद्रुमाभ्यांतराभांबालांहस्ताक्षमालां
कमलधृतकरांहंसवाहांद्विवाहांगायत्रीमुद्गिरंतीमनवरतमृचोब्रह्म ॥८॥
दैवत्यचिंत्यांनासाद्बिंबांतरालस्थितममतिमहसेसाहमस्मीत्युपासे॥२॥
मध्याह्नध्यानं॥मुग्धांमध्याह्नसंध्यांसितचंदनलसत्सचिरांव्याघ्रवं

त्रिंवसानां हस्तेधत्ते त्रिशूलं डमरुमपियजुर्वेदमध्युक्ष्िरंती॥ सावित्रीसवानेत्रां सितवृषभगमनां रुद्रदैवत्यचिंत्यां नित्यामादित्यकांत्याकलिततनुमनुसा हमस्मीत्युपासे॥२॥ सायंध्यानं॥ सायंसंध्यांस्थूलदेहांखगपतिगमनांश्यामवर्णांसुमध्यां शंखचक्रे दधानांकरयुगयुगले सारस्वतीमुदारां॥ पीतवस्त्रंदधानांरवितनुवसनां विष्णुदैवत्यचिंत्यांसामवेदंवदंतीं स्मितसुमसमांस्याहमस्मीत्युपासे॥३॥ अथत्रिकालसहस्रोध्यानं॥ पंचवक्त्रां चतुर्हस्तांप्रतिवक्त्रत्रिलोचनां॥ जटाकिरीटबद्धकुटिलिं त्रिपदां स्फटिकप्रभां॥ साक्षसूत्रमयांकुशौ दधतीं दक्षिणहस्तयोः॥ साचीरींकमलंपत्रंवरदंनंदनकुलंवामहस्तयोः॥ दिव्यानुपरिमितांकुक्षिपूर्वपश्चिमयोः समात्॥ रक्तेकंकणकेयूरहारकुंडलनूपुरैः॥ रत्नोरवक्षोधैरन्यैरामरणैर्वरैः॥ शोभितांरत्नपीठस्थां गायत्रीं चर्वसंस्थितां॥४॥ एवंदेवींसदाध्यायन्जपंकुर्वीतयोद्विजः॥ सर्वपापविनिर्मुक्तः स्ववांछितफलंलभेत॥५॥ एवंध्यानं॥ ततः पूजा॥ आयातित्तिमंत्रस्यविश्वेदेवाऋषयः प्रभुर्मोदेवता॥

त्रीमावाहयामि। ॐ सरस्वतीमावाहयामि। ॐ छंद२४ आ २
ऋषिमावाहयामि ४
अनुष्टुप् छंदः। गायत्र्यावाहने विनियोगः॥ ॐ आयातु वरदा देवी अक्षरं ब्र
ह्मसंमितं॥ गायत्री छंदसां मातरिदं ब्रह्म जुषस्व नः॥ ओजोसि सहोसि बलम
सि भ्राजोसि देवानां धाम नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुः
अभिभूरों गायत्रीमावाहयामि॥ आगच्छ वरदे देवि जाप्ये मे सन्निधिं
कुरु॥ गायंतं त्रायसे यस्मात् गायत्री त्वं ततः स्मृता॥ इति भगवतीमावाह्य
सव्याहृतिकं गायत्रीमंत्रमुच्चार्य धर्मादि पीठे तत्पीठे गायत्रीं सावरणां
संहितां लिखेत्॥ अथ पीठोद्धारक्रमः॥ ॥ शक्तेर्बीजमथ वेदाग्नकोणैर्विल
सद्भूरादिसत्कर्णिकं चञ्चद्बिस्वरयुग्मकेसरदलैर्वर्गैस्त्रिवर्णैर्मनौः॥ चतु
र्मंत्रतुरीयवेष्टितमदः क्ष्माकोणतारांकितं गायत्र्याः कथितं महः प्रभवति
निर्यंत्रं तु दिव्यं कितं॥ १॥ ह्रींकारं कर्णिकामध्ये व्याहृतीनां त्रिकोणके॥ व
र्णितं स्यात् षडलं पद्मं प्रोक्तं नदाणलक्षितं॥ २॥ केसरेषु स्वरान्नलिख्य मंत्र
[illegible] दलेषु [illegible] मंडलं॥ आपो
बर्णा स्त्र यत्र चः॥ आदिवर्गाक्षरा [illegible] च वाहि [illegible] मंडलं॥ आपो
ज्योतिरित्येतस्यावेष्टये द्यं [illegible] मुत्तमं॥ भूजैरेनं समालिख्य कुंकुमं रो ॥१४॥

चनादिकं ॥ मंत्रराजं समंद्रत्वं जपेदिष्टार्थसिद्धये ॥ एवं धर्म्मपीठमुद्धार्य
गायत्री मंत्रं देवतां लिख्या । अष्टदलपद्ममध्ये ॥ दिक्षु धर्म्माय नमः । ज्ञाना
यनमः ॐ वैराग्याय नमः । ऐश्वर्य्याय नमः । विदिक्षु अधर्म्माय नमः । अ
ज्ञानाय नमः । अवैराग्याय नमः । अनैश्वर्य्याय नमः । मध्ये मूलाय । कं
दाय । नालाय । तमसे रजसे । वामायै । तत्वात्मने । विद्यातत्वात्मने । पत्रेभ्यः ।
केसरेभ्यः । कर्णिकायै पृथिव्यै । कूर्माय । अनंताय । आधारशक्तये नमः
। सर्वत्र एवं मंत्रः । पूजितपीठे तां प्रतिष्ठाप्य आवाह्य अष्टमुद्राः प्रदर्श्य
ॐ भूः नमः आवाहनं । ॐ भुवः स्थापयामि नमः । ॐ स्वः सन्निधानं । ॐ म
हः सन्निरोधनं । ॐ जनः सकलीकरणं । ॐ तपः अवगुंठनं । ॐ सत्यं अमृ
तीकरणं । ॐ भूर्भुवः स्वः परमीकरणं । ततः पूजा गायत्र्यै सांगायै सायुधा
यै सपरिवारायै सवाहनायै सवर्णायै आसनं परिकल्पयामि नमः इति
गंधपुष्पधूपदीपनैवेद्यतांबूलादीन् षोडशोपचारान् मनसा समर्प
येत् ॥ ब्राह्मीमाहेश्वरीकौमारीवैष्णवीवाराहीऐंद्रीचामुंडामहालक्ष्मी
रिति शक्तीर्देव्याः [illegible] पूजयेत् । अस्तितांग [illegible]

ॐ क्रोधमुन्मत्तभैरवं ॥ कपालं भीषणं चैव संहारं चाष्टभैरवान् ॥ पद्मप
त्राग्रे प्रदर्शयेत् ॥ एवं मानसपूजां कृत्वा सर्वं ध्यात्वा चतुर्विंशतिमुद्राः प्र
दर्शयेत् ॥ नाम्ना व्यासेन दर्शिताः ॥ अथ यान्नैव मुद्राः संमुखं संपुटं तथा ॥ दर्शये
ततो वितत विस्तीर्णे द्विमुखं त्रिमुखं ततः ॥१॥ चतुर्मुखं पंचमुखं षण्मु
खाधोमुखं ततः ॥ व्यापकांजलिकं चैव शकटं तदनंतरं ॥२॥ यमपाशं च ग्र
थितं ततः स्यात् सन्मुखोन्मुखं ॥ विलंबो मुष्टिको मीनस्ततः कूर्मवराहकौ ॥
॥३॥ सिंहक्रांतं महाक्रांतं ततो मुद्गरपल्लवौ ॥ एतास्तु मुद्राः देवताः सौम
न्यये महाजनसमागमेन दर्शनीयाः ॥ [illegible] अथ [illegible] दुरितक्षयकारा श्री
10 परमेश्वरप्रीत्यर्थं अष्टोत्तरशतादि संख्याकं गायत्रीजपं करिष्ये इति संक
ल्प्य ॥ प्रातस्तिष्ठन्नु [illegible] पाणि मेध्याकृ चासीनस्तिर्यगवाक्पाणिः
प्र प्रमुदकस्पृङ् मुखो विषयेभ्यो मनः संहृत्य शुचिर्मौनी अव्यग्रो निर्वि
लोमं त्रार्थमनुसंदधानः रात्र्यां जपेत् ॥ उक्तं च रूपांशुः । मानसं वा ॥१०॥
हितां माल्यया अंगुलीपर्वभिर्वा जपं कृत्वा षडंगन्यासः । ततः सुरभिः ज्ञानं
सिंहा च योनिः । कूर्मोऽथ पंकजं । लिंगं । निर्याणमुद्राष्टौ जपांते च

प्रदर्शयेत्॥ जपांते एवं षडंगन्यासः कर्त्तव्यः। ॐ तत्सवितुर्ब्रह्मात्मने हृदया
य नमः। ॐ वरेण्यं विष्ण्वात्मने शिरसे स्वाहा। ॐ भर्गो देवस्य रुद्रात्मने शि
खायै वषट्। ॐ धीमहि ब्रह्मात्मने कवचाय हुं। ॐ धियो यो नः विष्णवा
त्मने नेत्रत्रयाय वौषट्। ॐ प्रचोदयात् रुद्रात्मने अस्त्राय फट्। इति ष
डंगः। ततश्चतुर्थपादेनापि पूर्ववदेव षडंगः कर्त्तव्यः। उत्तमे इति मंत्र
स्य विष्णु ऋषिः देवी देवता। अनुष्टुप् छंदः। आवाहनविसर्जने विनि
योगः। ॐ उत्तमे शिखरे जाता भूम्यां पर्वतमस्तके॥ ब्राह्मणेभ्यस्त्वमनुज्ञा
ता गच्छ देवि यथासुखं॥ गुह्यातिगुह्यगोप्त्री च गृहाणास्मत्कृतं जपं कृत
॥ जपात्सिद्धिर्भवतु मे तत्प्रसादात्त्वयि स्थिता॥ इति जपं समर्प्य पश्चाद्गा
यत्रीतर्पणं॥ प्राणानायम्य गायत्र्या आर्यादि स्मरता तर्पणे विनियोगः
इत्युक्त्वा षडंगं कृत्वा पूर्ववदेव। जले स्थले वापि गायत्रीपीठदेवतामु
द्धार्य मानसैरुपचारैः संपूज्य तदुपरि तर्पणं कारयेत्। ॐ भूर्भुवः कुर्यात
स्वः पुरुषं ऋग्यजुःसाममयं मंडलांतर्गतं सवितारमावाहयामि।
इत्यावाह्य तर्पणं कुर्यात्। तत्रैवं मंत्राः। ॐ भूर्भुवः स्वः तत्सवितुर्वरे

णियं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॐ तर्पयामि नमः। इति पुरश्चरणदशांशेन तर्पणं नित्यतर्पणं। ॐ भूः पुरुषऋग्वेदायनमस्तर्पयामि। ॐ भुवः पुरुषयजुर्वेदायनमस्तर्पयामि ।२। ॐ स्वः पुरुषसामवेदायनमस्तर्पयामि ।३। ॐ महः पुरुषअथर्ववेदायनमस्तर्पयामि ।४। ॐ जनः पुरुष[illegible] इतिहासपुराणायनमस्तर्पयामि ।५। ॐ तपः पुरुषसर्वांगमाय० ।६। ॐ सत्यं पुरुषसर्वलोकाय० ।७। ॐ भूर्भुवः स्वः पुरुषऋग्यजुःसाममंडलांतर्गतायनमः सवित्रे० ।८। ॐ भूः एकपदागायत्र्यै ।९। ॐ भुवः द्विपदागायत्र्यै० ।१०। ॐ स्वः त्रिपदागायत्र्यै ।११। ॐ भूर्भुवः स्वः चतुष्पदागायत्र्यै० ।१२। ॐ उषसे नमः ।१३। ॐ गायत्र्यै ।१४। ॐ सावित्र्यै० ।१५। ॐ सरस्वत्यै० ।१६। ॐ वेदमात्रे० ।१७। ॐ पृथिव्यै० ।१८। ॐ अजायै० ।१९। ॐ सांकृत्यै ।२०। ॐ कौशिक्यै० ।२१। ॐ सर्वपराजित्यै० ।२२। ॐ सहस्रमूर्त्यै० ।२३। ॐ अनंतमूर्त्यै नमस्तर्पयामि ।२४। मंत्रैरेभिस्त्वया नित्यं ।।११।।
गायत्रीं वेदमातरं ।। चतुर्विंशतिसंख्याके स्तर्पितं सचराचरं ।। इति गायत्री तर्पणं ।। अथ संध्यातर्पणं ।। गायत्र्याः व्यासऋषिः । ब्रह्मादेवता । गायत्री

छंदः ॥ ॐ भूः पुरुषंतर्प्पणं करिष्ये ॥ ॐ भूः पुरुषंतर्प्पयामि ॥१॥ ॐ ऋग्वे
दंतर्प्पयामि ॥२॥ ॐ रवि मंडलं० ॥३॥ ॐ हिरण्यगर्भरूपिणं० ॥४॥ ॐ
आत्मानं० ॥५॥ ॐ गायत्री० ॥६॥ ॐ वेदमातरं० ॥७॥ ॐ सांकृतिं० ॥८॥
ॐ संध्यां ॥९॥ ॐ कुमारीं० ॥१०॥ ॐ ब्राह्मीं० ॥११॥ ॐ उषसीं ॥१२॥ ॐ निम्र
जां० ॥१३॥ ॐ सर्वार्थसिद्धिकरीं० ॥१४॥ ॐ सर्वमंत्राधिपतीं० ॥१५॥ ॥
ॐ भूर्भुवः स्वः पुरुषंतर्प्पयामिनमः ॥१६॥ तर्प्पयामि नम इति प्रत्ये
कं संबंधः ॥ इति प्रातः संध्यातर्प्पणं ॥ ॥ अथ मध्याह्न संध्यातर्प्पणं ॥
ॐ मध्याह्नकाले संध्या सावित्र्याः कश्यप ऋषिः। रुद्रो देवता। अग्निक
छंदः ॥ ॐ भुवः पुरुषंतर्प्पणं करिष्ये ॥ ॐ भुवः पुरुषंतर्प्पयामि ॥१॥
ॐ यजुर्वेदंतर्प्पयामि ॥२॥ ॐ मंडलंतर्प्पयामि ॥३॥ ॐ रुद्ररूपिणं० ॥४॥
ॐ अंतरात्मानं० ॥५॥ ॐ सावित्री ॥६॥ ॐ वेदमातरं० ॥७॥ ॐ सांकृतिं
० ॥८॥ ॐ संध्यां० ॥९॥ ॐ युवतिं० ॥१०॥ ॐ रौद्रीं० ॥ ॐ मध्याह्नीं० ॥१२॥
ॐ निम्रजां० ॥१३॥ ॐ सर्वार्थसिद्धिकरीं० ॥१४॥ ॐ सर्वमंत्राधिपतीं

तर्पयामि ॥१५॥ ॐ भूर्भुवः स्वस्तर्पयामि नम इति प्रत्येकं संबंधः ॥१६॥ ॐ दु
तिसायंसंध्यातर्पणं ॥ पश्चादाचमनं प्राणायामान् कृत्वा। गायत्र्याः जपं नि
वेदयेत्। जपतर्पणानंतरं होमः ॥ ग्रहोक्तं कुंडं स्थंडिलं वा कृत्वा पश्चा
द्धोमं समारभेत ॥ शतहोमे रत्निमात्रं। सहस्रहोमे अरत्निमात्रं॥
मे ५ दशाहुतिहोमे तु पासनं कुर्यात्। अयुतहोमे बाहुमात्रं। लक्षहो
मे द्विहस्तकं। ग्रंथहृ महाकुंडं ग्रीवाकंठयोनिमेखलासहितं॥ स्रु
क्स्रुवौ यथालाभौ॥ स्रुचि राज्ञे उपविश्य संकल्प्य। पूर्वोक्तमेवं
12 गुणविशिष्टायां शुभतिथौ मम त्रसुसिद्ध्यर्थं पुरश्चरणसांगतार्थं ज
पतर्पणदशांशेन होमं करिष्ये। तदंगस्थंडिलउपलेपनउल्लेखन अ
ग्निप्रतिष्ठापनमहं करिष्ये। प्राणायामं विधाय करन्यासमंगन्यासं पू
र्ववत् सर्वं न्यासं कृत्वा। पश्चाद्ध्यानं ॥ व्यजनं तोमरं चैव स्रक् स्रुचौ दक्षि ॥१२॥
णे करे। दध्यानं वामहस्तेन घृतपात्रं विशेषतः ॥ एवं ध्यात्वा। ग्रायांतु दे
वं पुरुषं महांतं सुरासुरैर्वन्दितं हरी- रुद्रं । देवादयो येऽग्निमुखवा स
तुरिः। त्रिमेखलं त्रिपादं च सप्तजिह्वाग्निरावृतं। मेषारूढं चतुःशृंगं जटामुकुटमंडितं ३

वैप्रविश्यैकुंडे सुरलोकनाथाः ।। पश्चात्कुर्यात् मूलमंत्रेण ध्यानं कृत्वा
पीठदेवताः स्मृत्वा अन्वाधानं करिष्ये। तत्र देवतापरिग्रहार्थं आसमि तत्
न्वाहितेवरदाग्नौ जातवेदसमग्निमिध्मेन तु प्राजापतिरन्वाधारो आ
ज्येनाग्निषोमो आज्येन अत्र प्रधानं गायत्री सावित्री सरस्वती एताः
प्रधानदेवताः तिलाक्षतपायसाज्यद्रव्येण। स्विष्टकृतमिध्मसन्न
हनेन रुद्रं। अ— समग्निं देवान्विकं अग्निं वायुं सूर्यं प्रजापतिं च एताः
सर्वाः प्रायश्चित्तदेवता आज्येन अंगदेवताः प्रधानदेवताः सर्वाः सन्नि
हिताः संतु सांगोपांगेन कर्मणा। प्रयास्य स्वे। ॐ भूर्भुवः स्वः स्वाहा
प्रजापतये इदं न मम एवमन्वाधानं कृत्वा सर्वं गुरो लोके माचरेत्॥ व
र्णलक्षं जपेत मंत्रं तर्पयेच्च दशांशकं॥ बिल्वैः फलैः प्रसूनैर्वा — — स्त्रि
मधुसंयुतैः॥ कुर्याद्दशांशतो होमं ततः सिद्धो भविष्यति॥ मधुत्रितय
युक्तेन जुहुयात् पायसेन वा॥ कुबेरहस्तो लक्ष्म्या विद्याया धिषणाप
ते॥ यस्त्वेवं यजते भक्त्या जपहोमार्चनादिभिः॥ समुंते सकलान्भो
गानंते तत्पदमाप्नुयात्॥ द्वादशाहं त्रिसहस्रं जपेच्च जुहुयाद्घृतं॥ त्रि

संध्यं सर्पिषाग्निसैंनियचेविदिं[illegible]याएप — ।। त्रयोदशे दिने प्राप्ते निमज्या
प्सुरांत जपेत्।। एतत्त्रयाणां वर्णानां साधनं स्यात्त्रदि — वा। जपशील
स्य विप्रस्य विना सिध्यति साधनं।। साधनेनानुलोमायां विलोमायां
विप्रसिध्यति।। जपे प्रशस्ता सावित्री प्रणवेन समन्विता।। प्रतिप्रशस्त
केन स्याद्व्याहृतित्रितयेन च।। होमादौ प्रणवेनैव व्याहृतिभिरन्विता।।
जपे विप्र प्रणवेनैव प्रतिलोमा प्रशस्यते।। प्रणवेन विलोमाभिर्व्याहृति
भिः प्रशस्यते।। क्रूरे शांतिपुष्टिरभिचारे ततः परं।। प्रासंध्याया
दिवा कुर्यात्सर्वं रात्रौ न किंचन।। अथ शांतिप्राययुक्ताभिः समिद्भिर्जु
हुयाद्द्विजः।। शमीमयीभिः शाम्यंति भूतरोग[illegible]गदादयः।। प्रक्ता
भिः क्षीरिवृक्षस्य समिद्भिर्जुहुयाद्द्विजः।। जुहुयात्सकलैर्वापि भू
तरोगादि शांतये।। अपामार्ग समिद्भिर्वा यथोक्तैः सर्वशांतये।। दू
र्वाभिः पायसाक्ताभिर्होमो भूताधिमोचकः।। तिलहोमात्त्र शाम्यंति ।।१३।।
कुपिताः सर्वदेवताः।। परापचारसंभूता दोषा देवग्रहास्तथा।। त्रिमध्व
क्तैस्तिलैर्होमात्त्र शाम्यंति न संशयः।। जुहुयात्पचगव्येन भूतरो

13

गादिशांतये॥ जलेनतर्पयेत्सूर्यं पाणिभ्यां शांतिमाप्नुयात्॥ नाभिदघ्ने जलेस्थित्वा जपेच्छांतिमवाप्नुयात्॥ नाभिदघ्ने जले जप्त्वा सर्वान्दोषान्विनाशयेत्॥ कंठदघ्ने जले जप्त्वा मुच्येत्प्राणांतिकाद्भयात्॥ निमज्याप्सु शतं जप्त्वा सर्वापद्भ्यो विमुच्यते॥ सर्वेभ्यः शांतिकर्मभ्यो निमज्याप्सु जपोवरः॥ क्षीराहारी जपेल्लक्षं मपमृत्युं व्यपोहति॥ घृतेनाप्नुयान्मेधां वहुवि[illegible]द्योनसंशयः॥ हुत्वावेतसपत्राणि घृताक्तानि हुताशने लक्षपंचयेनहोमे सार्वभौमोनसंशयः॥ लक्षेणाचसमाहोमे नक्तत्वा ख्यातिरुत्तेनरः॥ आदित्याभिमुखंस्थित्वा नाभिमात्रेजलेजपेत्॥ तिलेनलक्षहोमेन घृताक्तेनहुताशने॥ सर्वपापविशुद्धात्मा रूपमेश्वर्यमाप्नुयात्॥ तिलतंडुलसंयुक्तं घृतानांचहुताशने॥ सर्वपापविशुद्धात्मापरंस्थानमवाप्नुयात्॥ पंचगव्येनलक्षस्यजपेजातीस्मरोभवेत्॥ तदेवासस्त्वारणं हुत्वाप्राप्नोतिबहुगोधनं॥ अन्नाज्यहवनंनित्यमन्नाज्यंलभतेसदा॥ लवणंमधुसंयुक्तं मिद्यावशीसर्वकं

मंत्रिणि ॥ जुहुयात्सर्वसमिधाज्याहुत्याऽयुतसंख्यया ॥ रक्तसिद्धार्थकं जु
ह्यात्तं हुत्वा वै सर्वसाधनं ॥ रिपुं रक्तकरवीराणि हुत्वा द्रावयते नरान् ॥
कुलावै भीतकं तैलं दिशोदशा प्रचालयेत् ॥ हुत्वा तु निंबपत्राणि विद्वेषं
कुरुते नृणां ॥ प्रत्यायनसिद्ध्यर्थं मधुसर्पिः समन्वितं ॥ गव्यक्षी
रं प्रदीप्ताग्नौ जुहुयात्तत्र समाहितः ॥ हवने च मिताहारः सह
स्त्रत्रितयं जपेत् ॥ संवत्सरेण लभते धनमेव न संशयः ॥ समि
कीर्णं ॥ द्भिश्च पलाशानां मर्कं जं तु विशेषतः ॥ पुष्पाणां समिधश्चैव हु
त्वा तु मम वाप्नुयात् ॥ चतुर्विंशति लक्षं तु कुर्वीत जपमादरात् ॥
जुहुयात्तद्दशांशेन तद्दशांशेन तर्पणं ॥ मार्जनं तद्दशांशेन तथा ब्रा
15 ह्मणभोजनं ॥ एवं कृते तु सिद्धिः स्यात्फलार्थं तु ततो जपेत् ॥ पुरश्च
रणमेकं तु कृत्वा संपूज्य सरस्वती ॥ आयुते हे यजेद्धोमः कार्योऽर्क ॥१४॥
समिधैः शुभैः ॥ औदुंबरैरन्नकामस्तेजः कामस्तु खादिरैः ॥ अपा
मार्गसमिद्धोमाद्भूतबाधा विनश्यति ॥ ग्रहबाधा विनाशाय जपेदश्व

स्यसन्निधौ॥ लवणान्वितदध्याक्ता तीक्ष्णा या स्युस्तस्य संभवाः॥ हूयन्ते समिधः शुक्लाः स्वाहान्ते मन्त्रमुच्चरेत्॥ दशापं चाहुतीर्हुत्वा गच्छन् गृहे तु दीरयेत्॥ यावद्धोमं च दद्यं तु पुरुषमाहारसम्मितं॥ एवं कृते विमुच्येत पुमान् स्त्री वा महाग्रहात्॥ यजेत निष्ठेत् पुरुषं तस्यानाभिमुखो भवेत्॥ जुहुयाच्छ्वेतपुष्पाणि सहस्राणीष्टमाप्नुयात्॥ लाजाहोमं तु कन्यार्थी कन्यां प्राप्नोति रूपिणीं॥ लाजाश्च मधुसंयुक्ताः श्वेतपुष्पाणि वा पुनः॥ हूयन्ते हरितेदे शैलस्य विश्वं वशी भवेत्॥ वामांगमुन्नेतकार्यं स्त्री वशीति विचक्षणैः॥ अरिसैन्यप्रशान्त्यर्थं तिलानाज्येन संयुतान्॥ तीमः पालाशसमिधैः कर्तव्यो घृतसंयुतैः॥ वृष्टिकामो जपेल्लक्षं तिलहोमघृताक्ततैः॥ एवं कृते तु सिद्धिः स्यान्निःकामः प्राप्नुयात्परं॥ सकामः प्राप्नुयाद्दीर्घं गायत्र्याः साधनं च तत्॥ श्रीकामः शान्तिकामो वा जपेल्लक्षमतन्द्रितः॥ श्रीकामो विल्वसमिधैः शान्तिकामः शमीमयैः॥ जुहुयादाज्यसमिधैस्तर्पणं मार्जनं ततः॥ एवं सर्वेषु कामेषु होमान्ते जुहुयाद्ध्रुवैः॥ जुहुयाल्लक्षं तु पुत्रार्थी पायसं जुहुयात्ततः॥

वित्तार्थी श्रीफलैर्होममायुःकामस्तु दूर्वया ।। तिलैरेवान्नसमिधैस्तेजः
कामो घृतेनवै ।। व्रीहिभिः पशुकामस्तु राज्यकामस्तु वैयवैः ।। पायसं स
र्वकामेषु होतव्यं शर्करान्वितं ।। भ[illegible]न्याम्रपत्राणि तीव्रज्वरविनाश
ने ४ नं ।। सर्वरोगविनाशाय सूर्यस्याभिमुखो भवेत् ।। एतत्त्रयाणां व
र्णानां गायत्र्याः साधनं महत् ।। अनया सर्वकार्याणि साधयेदात्म
संस्थितान् ।। कृत्वा चैवोदिशीन्यस्य पवित्रं पापनाशनं ।। पश्चात्स
माहितः कुर्यात्स्वध्यानं चापि समन्वितः ।। ईदृशीं चैव गायत्रीं ध्यायते
यस्तु नित्यशः ।। सर्वपापविनिर्मुक्तः स गच्छेत्परमं पदं ।। ५ ।। गाय
त्रीकृतविन्यासो विप्रो वेदषडंगवित् ।। तारयित्वा तथा गोत्रान् कुलं
नामेक विंशतिं ।। यं यं स्पृशति हस्तेन यं यं पश्यति चक्षुषा ।। यं यं
ध्यायति गायत्रीं स सर्वः पूत एव च ।। दशभिर्जन्मजनितं शतेन तु
पुराकृतं ।। त्रियुगं तु सहस्रेण गायत्री हन्ति दुष्कृतं ।। एकतश्चतु ।।१५।।
रो वेदाः सांगाश्च सपदक्रमाः ।। एकतश्चैव गायत्री तुल्यरूपा भवे
त्तदा ।। गायत्र्या न परं जाप्यं गायत्र्या न परं तपः ।। गायत्रीं जपतो नि

त्यं पुनर्जन्म न विद्यते ॥ ॥ इति श्री गायत्री ब्रह्मकल्पः समाप्तः ॥ शि

वमस्तु ॥ ॥ अथ देव वशिष्ट शापविमोचनी गायत्री जपित्वा पश्चाद्गाय

त्रीन्यास ध्यान जप होमः ॥ अस्य श्री वसिष्ट शापविमोचनी गायत्री

मंत्रस्य विश्वामित्र ऋषिः । सूर्यो देवता गायत्री छंदः । वसिष्ट शापवि

मोक्षार्थे विनियोगः । ॐ तत्सवितुर्ब्रह्मात्मने हृदयाय नमः इति षडं

गकरन्यासं कृत्वा । पश्चाज्जपः ॥ ॐ अहो देवि महादेवि दिव्ये संध्ये सरस्व

ति ॥ अजरे अमरे चैव ब्रह्मयोनि नमोस्तु ते ॥ वसिष्ट शापात् मुक्ता

भव इति मंत्रः ॥ आगच्छ वरदे देवि त्र्यक्षरे ब्रह्मवादिनि ॥ श्रीः ॥

गायत्री प्रकृतिः प्रोक्ता प्रणवः पुरुषस्तथा ॥ ताभ्यामुपसंयोगाद्वि

श्वसृष्टिरितीरिता ॥ १ ॥ प्रणवं पूर्वमुद्धृत्य भूर्भुवः स्वस्तथैव च ॥ तु

रीयसहैव गायत्र्या जप एवमुदाहृतः ॥ २ ॥ रक्तांगी सुरजो गुणा स्तु

नयनां हंसाधिरूढां स्मरेद्द्विजा एतामनुनयं मुपबसा स्त्रजं स्तुकस्तु

चं ॥ गायत्री मज देवतां द्विजकृतां यज्ञोपवीतोत्तमां ॥ वालो भानुप

॥ ॥ पद्मस्थितामनुपमां अरुणारुणपिणीमुज्वलां ॥१॥ रौद्रीं चतुर्भुजनेत्रां तमोगुण
युतां सूर्याध्वगां सुंदरीं त्र्यक्षां [illegible] चतुर्भुजां सितवृषारूढाममरूढ
द्युतिं ॥ खट्वांगाभयशूलखड्गविलसत्पाणिं यजूरूपिणीं सावित्रीं
रविमार्गगां च युवतिं मध्यंदिने संस्मरेत् ॥२॥ ध्यायेत्सत्वगुणां च
तुर्भुजयुतां नीलोत्पलश्यामलां ध्रो [illegible] चक्रांख ---- शुभगदा
पाणिं सुपर्णस्थितां ॥ संध्यां साममयीं सुरासुरयुतां सूर्याध्वगां सुंद
रीं सहितां च सरस्वतीं भगवतीं तुंगस्तनीं वैष्णवीं ॥३॥ मुक्ताविद्रुम ॥
॥४॥ आदित्यमंडल ॥४॥ बहिर्निष्ठो न वेद्विप्रस्तावारः कालसंज्ञकाः ॥
काले का [illegible] कर्तव्या शुद्धिर्भवति नान्यथा ॥ इति श्री [illegible] भग
वत्प्रोक्ते स्वायंभुवमन्वंतरे सांख्ययोगसारे दक्षप्रागमे श्रीमत्तु [illegible] दाव
भगायत्री हृदयं संपूर्णं ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ अंगपादपदं वर्णं चंपकं तव
मावृतं ॥ व्याहृत्यादं डमा [illegible] मुद्राण्येतानि वैदत्रा ॥ शुद्धं विंदुयुतं विसर्गसहितं ॥१६॥
[illegible] या श्रीयुतं -- संपुटितं तथैव परयाश्रीतिद्वयोर्लंकृतं ॥ आरोहा
दवरोहणं च कुरुतां न्यासं तथा ॥ संगमा ~ दशाधाविभज्य कुरुते साक्षात्स